# Mama Bharatam Vijayate

# મમ ભારતં વિજયતે

## Document Information

Text title : Mama Bharatam Vijayate

File name : mamabhArataMvijayate.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Dr. Ramakant Shukla

Proofread by : Mandar Kulkarni

Acknowledge-Permission: Dr. Ramakant Shukla, Devavani Parishad, Delhi

Latest update : May 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2024

*sanskritdocuments.org*

# Mama Bharatam Vijayate

## મમ ભારતં વિજયતે

મમ ભારતં વિજયતે ।
નિગમાગમૈરુપેતં વિજ્ઞાનરત્નરમ્યમ્ ।
વેદાઙ્ગપૂતગાત્રં મમ ભારતં વિજયતે ॥ ૧॥

લોકપ્રબોધશીલં શોકપ્રણાશશીલમ્ ।
ચેતોવિકાસકુશલં મમ ભારતં વિજયતે ॥ ૨॥

સહ્યાદ્રિવિન્ધ્ય હિમવત્સપ્તાદ્રિકીર્તિતશ્રી
ગઙ્ગાજલૈઃ પવિત્રં મમ ભારતં વિજયતે ॥ ૩॥

ક્વાપિ શ્રમેણ સહિતં ક્વાપિ પ્રમોદભરિતમ્ ।
નાનાક્રિયાકલાપં મમ ભારતં વિજયતે ॥ ૪॥

ગાન્ધી રવીન્દ્ર ગૌતમ નેહરૂપ્રભૃત્યનેકૈઃ ।
જનનાયકૈઃ સમૃધ્દ્ધં મમ ભારતં વિજયતે ૧૧॥ ૫॥

કમ્બન્કબીર તુલસીકવિકાલિદાસગીતમ્ ।
વિબુધૈઃ સદૈવ ચેષ્ટં મમ ભારતં વિજયતે ॥ ૬॥

કોણાર્કતાજસાઁચીખજુરાહોસારનાથૈઃ ।
કુતુબાદિના ચ મહિતં મમ ભારતં વિજયતે ॥ ૭॥

શ્રુતભાખડ઼઼ાન રૌરાકોટાભિલાઇકલ્પૈઃ
સંયન્ત્રકૈઃ સમિધ્દ્ધં મમ ભારતં વિજયતે ॥ ૮॥

સિંહસ્થ કુમ્ભસારણનવચણ્ડિકાદિભવ્યૈઃ
મેલાપકૈઃ પ્રસન્નં મમ ભારતં વિજયતે ॥ ૯॥

વિશ્વસ્ય બાન્ધવં યત્, મોક્ષસ્ય સાધકં યત્ ।
ગાયચ્ચ પઞ્ચશીલં મમ ભારતં વિજયતે ॥ ૧૦॥

નિન્દન્તુ નીતિનિપુણાઃ યદિ વા સ્તુવન્તુ કામમ્ ।

નિત્યં વિકાશમાનં મમ ભારતં વિજયતે ॥ ૧૧॥

જય ભારતભૂમે ! (સંસ્કૃતકાવ્યમ્)

રચના - ડૉ. રમાકાન્ત શુક્લઃ

Proofread by Mandar Kulkarni

---

*Mama Bharatam Vijayate*

pdf was typeset on May 11, 2024

Please send corrections to *sanskrit@cheerful.com*